# Shachikritam Guru Stotram

# શચિકૃતં ગુરુસ્તોત્રમ્

## Document Information

Text title : Shachikritam Guru Stotram

File name : shachikRRitaMgurustotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, gurudev, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 374/124-140||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 13, 2026

*sanskritdocuments.org*

# શચિકૃતં ગુરુસ્તોત્રમ્

સર્વેષાં તુ ગુરૂણાં ચ જન્મદાતા પરો ગુરુઃ ।
પિતુઃ શતગુણા માતા પૂજ્યા વન્દ્યા ગરીયસી ॥ ૧૨૪॥

વિદ્યાદાતા મન્ત્રદાતા જ્ઞાનદો હરિભક્તિદઃ ।
પૂજ્યો વન્દ્યશ્ચ સેવ્યશ્ચ માતુઃ શતગુણો ગુરુઃ ॥ ૧૨૫॥

અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જનશલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરુવે નમઃ ॥ ૧૨૬॥

જન્મદાતાઽન્નદાતા ચ તથાઽન્યે ગુરુવો મતાઃ ।
આરોપિતાશ્ચ ગુરવઃ પ્રસહ્ય ગુરુવસ્તથા ॥ ૧૨૭॥

તથોપગુરવઃ સન્તિ શિક્ષકા ગુરુવોઽપિ ચ ।
પારં કર્તું ન શક્તાસ્તે ઘોરસંસારસાગરે ॥ ૧૨૮॥

વિદ્યામન્ત્રજ્ઞાતદાતા નિપુણઃ પારકર્મણિ ।
સ શક્તઃ શિષ્યમુદ્ધર્તુમીશ્વરશ્ચેશ્વરેશ્વરઃ ॥ ૧૨૯॥

ગુરુર્વિષ્ણુર્ગુરુર્બ્રહ્મા ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુર્ધર્મો ગુરુઃ શેષઃ સર્વાત્મા કેશવો ગુરુઃ ॥ ૧૩૦॥

સર્વતીર્થાધિવાસશ્ચ સર્વદેવાધિવાસિતઃ ।
સર્વદેવાત્મકો દિવ્યો ગુરુરૂપી હરિઃ સ્વયમ્ ॥ ૧૩૧॥

અભીષ્ટદેવે વૈ રુષ્ટે ગુરુઃ શક્તો હિ રક્ષિતુમ્ ।
ગુરૌ રુષ્ટેઽભીષ્ટદેવો ન વૈ શક્તશ્ચ રક્ષિતુમ્ ॥ ૧૩૨॥

ગુરૌ રુષ્ટે ગ્રહા રુષ્ટા રુષ્ટા દેવાશ્ચ સર્વથા ।
ભાગ્યાન્યપિ ચ રુષ્ટાનિ ગુરું રુષ્ટં ન કારયેત્ ॥ ૧૩૩॥

ન ગુરોરધિકશ્ચાત્મા પ્રિયઃ પુત્રઃ પ્રિયોઽપિ ન ।
ધનં પત્ની તપો ધર્મઃ પુણ્યં સત્યં ન વૈ પ્રિયમ્ ॥ ૧૩૪॥

ગુરોઃ પરો ન વૈ શાસ્તા રાજા બન્ધુર્ન વૈ પરઃ ।
મન્ત્રો વિદ્યા ગુરુર્દેવઃ પૂર્વલબ્ધઃ પતિસ્તથા ॥ ૧૩૫॥

પરાત્પરઃ સ વિજ્ઞેયઃ સર્વેષામુપરિ સ્થિતઃ ।
માતા વન્દ્યા પિતા વન્દ્યો વન્દ્યશ્ચ ત્વાદૃશો ગુરુઃ ॥ ૧૩૬॥

વિપ્રાણાં ત્વં વરિષ્ઠોઽસિ ગરિષ્ઠશ્ચ તપસ્વિનામ્ ।
બ્રહ્મિષ્ઠોઽસિ બ્રહ્મવિત્સુ ધર્મિષ્ઠઃ સર્વધર્મિણામ્ ॥ ૧૩૭॥

દેવાનાં સર્વથા પૂજ્ય ઇતિ જાનામિ સર્વદા ।
તતઃ ક્ષમાં યયાચેઽહં શપામિ નૈવ મદ્ગુરુમ્ ॥ ૧૩૮॥

તુષ્ટો ભવ મુનિશ્રેષ્ઠ! શક્રમાનય મા ચિરમ્ ।
નહુષં ત્વિન્દ્રભવનાચ્છીઘ્રં પ્રક્ષિપ ભૂતલે ॥ ૧૩૯॥

ઇત્યુક્ત્વા ત્વાન્તરે તૃપ્તા બહિઃ સૌમ્યા શચી તદા ।
મૌનમાલમ્બ્ય ધૈર્યેણ ફલં ચેયેષ સત્ત્વરમ્ ॥ ૧૪૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૩૭૪-અધ્યાયાન્તર્ગતં
શચિકૃતં ગુરુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૩૭૪/૧૨૪-૧૪૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 374/124-140..

Proofread by PSA Easwaran

*Shachikritam Guru Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*